SREE LALITHA SAHASRANAMA STOTRAM

DEVANAGARI SCRIPT (SANSKRITAM)

Austin Hindu Temple

9801 Decker Lake Road,
Austin, TX 78724

Ph: 1-512-927-0000

॥ ॐ श्री ललिता सहस्रनाम स्तोत्रम् ॥

ॐ ऐम् ह्रीम् श्रीं श्रीमत्रेनमः

॥ ध्यानम् ॥

सिन्धूरारुण विग्रहाम् त्रिनयनाम् माणिक्यमौळिस्फुरत्
तारानायक शेखराम् स्मितमुखीमापीनवक्शोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचशकम् रक्तोत्पलम् बिभ्रतीम्
सौम्याम् रत्न घतस्थ रक्तचरणाम् ध्ययेत्परामंबिकाम् ॥

श्री–माता श्री महारज्ञी श्रीमत्सिम्हासनेश्वरी
चिदग्नि कुन्ड–सम्भूता देव–कार्य समुद्यता – १

उद्यद्भानु सहस्राभा चतुर्बाहु समन्विता
रागस्वरूप पाशाढ्या क्रोधाकाराङ्कुशोज्वला – २

मनोरूपेक्शु–कोदन्डा पन्चतन्मात्र सयका
निजारुण प्रभापूर मज्जद्ब्रम्हान्ड मन्डला – ३

चन्पकाशोक पुन्नाग सौगन्धिक लसत्कचा
कुरुविन्दमणि श्रेणी कनत्कोटीर मन्डिता – ४

अष्टमीचन्द्र विभ्राज दलिकस्थल शोभिता
मुखचन्द्र कलङ्काभ मृगनाभि विशेषका – ५

वदनस्मर माङ्गल्य गृहतोरण चिल्लिका
वक्त्रलक्ष्मी परीवाह चलन्मीनाभ लोचना – ६

नवचम्पक पुष्पाभ नासदन्ड विराजिता
ताराकान्ति तिरस्कारि नासभरण भासुरा – ७

कदम्बमन्जरी क्लृप्त कर्णपूर मनोहरा
ताटन्क युगलीभूत तपनोडुप मन्डला – ८

पद्मरागशिलादर्श परिभावि कपोलभूः
नवविद्रुम बिम्बश्री न्यक्कारी रदनछदा – ९

शुद्धविद्यांकुराकार द्विजपंक्ति द्वयोज्वला
कर्पूरवीटिकामोद समाकर्षद्दिगन्तरा – १०

निजसल्लाप माधुर्य विनिर्भर्त्सितकच्छपी
मन्दस्मित प्रभापूर मज्जत्कामेश मानसा – ११

अनाकलित सादृश्य चुबुकश्री विराजिता
कमेश बद्द मान्गल्य सूत्र–शोभित कन्धरा – १२

कनकाङ्गद केयूर कमनीय भुजान्विता
रत्नग्रैवेय चिन्ताकलोल मुक्ता फलान्विता – १३

क्ऱउम्उगμउर प्रेमरत्न मणि प्रतिपणस्तनी
नाभ्यालवाल रोमालि लता फल कुचद्वयी – १४

लक्ष्य रोमलताधारता समुन्नेय मध्यमा
स्तनभार दलन्मध्य पट्टबन्ध–वलित्रया – १५

अरुणारुणकौसुम्भ वस्त्र भास्वत्–कटीतटी
रत्नकिङ्किणिकारम्य रशना दाम भूषिता – १६

कमेशज्ञानत सौभाग्य मर्दवोरु द्वयान्विता
माणिक्य मुकुटाकार जानुद्वय विराजिता – १७

इन्द्रगोप परिक्षिप्तस्मरतूणाभ जंघिका
गूढगुल्फा कूर्मपृष्ट–जयिष्णु–प्रपदान्विता – १८

नखदीधिति संछन्न नमज्जन तमोगुण
पदद्वय प्रभाजाल पराकृत सरोरुह – १९

सिञ्जानमणिमन्जीर मन्डित श्रीपदाम्बुजा
मराली मन्दगमना महालावण्य शेवधिः – २०

सर्वारुणाऽनवद्याङ्गी सर्वाभरण भूषिता
शिव–क्उम्उगμउरउङ्क!स्था शिवा स्वाधीन–वल्लभा–२१

सुमेरु–मध्य–श्रुङ्गस्था श्रीमन्नगर–नायिका
चिन्तमणि गृहान्तस्था पञ्च–ब्रम्हासन–स्थिता – २२

महापद्माटवी–संस्था कदम्बवनवासिनी
सुधासागर मध्यस्था कामक्षी कामदायिनी – २३

देवर्षिगण–संघात स्तूयमानात्म–वैभवा
भन्डासुर–वधोद्युक्त–शक्तिसेना समन्विता – २४

सम्पत्करी समरूढ सिन्धुर व्रजसेविता
अμउउअढव्उलृध्उलृष्टत्उउμउ कोटि कोटिभिरावृता –२५

चक्रराज–रथारूढ सर्वायुध परिष्कृता
गेयचक्र रथारुढ मन्त्रिणी परिसेविता – २६

किरिचक्र रथारुढ दण्डनाथा पुरस्कृता
ज्वालामालिनिकाक्षिप्त वह्निप्राकार मध्यगा – २७

भन्डसैन्य वधोद्युक्त शक्ति विक्रम हर्षिता
नित्या–पराक्रमाटोप निरीक्षण समुत्सुका – २८

भण्डपुत्र वधोद्युक्त बालाविक्रम नन्दिता
मन्त्रिण्यम्बा विरचित विषङ्गवधतोषिता – २९

विशुक्र प्राणहरण वाराही वीर्यनन्दिता
कामेश्वर मुखालोक कल्पित श्रीगणेश्वरा – ३०

महागणेश निर्भिन्न विघ्नयन्त्र प्रहर्षिता
भन्डासुरेन्द्र निर्मुक्त शस्त्र–प्रत्यस्त्र–वर्षिणी – ३१

कराङ्गुलि नखोत्पन्न नारायण दशाकृतिः
महापाशुपतास्त्राग्नि निर्दग्धासुरसैनिका – ३२

क्ञम्उगµउरउस्त्र निर्दग्ध सभन्डासुर शून्यका
ब्रम्होपेन्द्र महेन्द्रादि देवसंस्तुत–वैभवा – ३३

हरनेत्राग्नि संदग्ध काम सञ्जीवनौषधिः
श्रीमद्वाग्भवकूटैक स्वरूप मुखपङ्कजा – ३४

कण्टाधः–कटि पर्यन्त मध्यकूट स्वरुपिणी
शक्तिकूटैकतापन्न कट्यधोभाग धारिणी – ३५

मूलमन्त्रात्मिका मूलकूटत्रय कलेवरा
कुलामृतैकरसिका कुलसंकेतपलिनी – ३६

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी
अकुला समयान्तस्था समयाचार–तत्परा – ३७

मूलाधरैक–निलया ब्रह्मग्रन्थि विभेदिनी
मणिपूरान्तरुदिता विष्णुग्रन्थि विभेदिनी – ३८

आज्ञाचक्रान्तरालस्था रुद्रग्रन्थि विभेदिनी
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी – ३९

तटिल्लता समरुचिः षट्चक्रोपरि संस्थिता
महासक्तिः–कुन्डलिनी बिसतन्तु–तनीयसी – ४०

भवानी भावनागम्या भवारण्य कुठारिका
भद्रप्रिया भद्रमुर्ति–र्भक्त–सौभाग्यदयिनी – ४१

भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा
शाम्भवी शारदाराध्या शर्वणी शर्मदयिनी – ४२

शाङ्करी श्रीकरी सध्वी शरच्चन्द्र निभानना
शातोदरी शान्तिमती निराधारा निरञ्जना – ४३

निर्लेपा निर्मला नित्या निराकारा निराकुला
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा – ४४

नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा – ४५

निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा
नीरागा रागमथनी निर्मदा मदनाशिनी – ४६

निश्चिन्ता निरहङ्कारा निर्मोहा मोहनाशिनी
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी – ४७

निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी
निःसंशया संशयघ्नी निर्भवा भवनाशिनी – ४८

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिगृहा – ४९

निस्तुला नीलचिकुरा निरपाया निरत्यया
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा – ५०

दुष्टदूरा दुराचारशमनी दोषवर्जिता
सर्वज्ञा सान्द्रकरुणा समानाधिक वर्जिता – ५१

सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा
स्उव्उग्तµउरऌ सर्वमयी सर्वमन्त्रस्वरूपिणी – ५२

सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी
म्उउहग्वμउरल्र महादेवी महालक्ष्मी–र्मृडप्रिया – ५३

महारूपा महापूज्या महा–पातक–नाशिनी
महामाया महासत्वा महाशक्ति–र्महारतिः – ५४

महाभोगा महैश्वर्या महवीर्या महाबला
महाबुद्धि–र्महासिद्धि–र्महायोगेश्वरेश्वरी – ५५

महातन्त्रा महामन्त्रा महायन्त्रा महासना
महायाग क्रमाराध्या महाभैरव पूजिता – ५६

म्उहग्वμउर महाकल्प महाताण्डव साक्षिणी
महाकामेश महिषी महात्रिपुरसुन्दरी – ५७

चतुष्षष्ट्युपचारढ्या चतुष्षष्टिकलामयी
महाचतुः षष्टिकोटि योगिनि गणसेविता – ५८

मनुविद्या चन्द्र विद्या चन्द्रमण्डल मध्यगा
चारुरुपा चारुहासा चारुचन्द्र कलाधरा – ५९

चराचर जगन्नाथा चक्रराज निकेतना
पार्वती पद्मनयना पद्मराग समप्रभा – ६०

पन्चप्रेतासनासीना पन्चब्रह्म स्वरूपिणी
चिन्मयी परमानन्दा विज्ञानघनरूपिणी – ६१

ध्यान–ध्यात्रु ध्येयरूपा धर्माधर्म–विवर्जिता
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका – ६२

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्था–विवर्जिता
सृष्टिकर्त्री ब्रह्मरूप गोप्त्री गोविन्दरूपिणी – ६३

संहारिणी रुद्ररूपा तिरोधानकरीश्वरी
सदाशिवाऽनुग्रहदा पन्चकृत्यपरायणा – ६४

भानुमण्डल–मध्यस्था भैरवी भगमालिनी
पद्मासना भगवती पद्मनाभ सहोदरी – ६५

उन्मेश निमिषोत्पन्न विपन्न भुवनावलिः
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् – ६६

आब्रह्मकीटजननी वर्णाश्रम विधयिनी
निजाज्ञारुप–निगमा पुण्यापुण्य–फलप्रदा – ६७

श्रुति सीमन्त सिन्दूरी–कृत पादाब्ज धूलिका
सकलागम सन्दोह शुक्ति सम्पुट मौक्तिका – ६८

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी
अम्बिकाऽनादि निधना हरिब्रह्मेन्द्र सेविता – ६९

नारयणी नादरूपा नामरूप विवर्जिता
ह्रीं कारी ह्रीमती हृद्या हेयोपादेयवर्जिता – ७०

राजराजार्चिता राज्ञी रम्या राजीवलोचना
रन्जनी रमणी रस्या रणत्किङ्किणि मेखला – ७१

रमा राकेन्दुवदना रतिरूपा रतिप्रिया
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा – ७२

काम्या कामकलारूपा कदम्ब कुसुमप्रिया
कल्याणी जगतीकन्दा करुणारससागरा – ७३

कलावती कलालापा कान्ता कादम्बरी प्रिया
वरदा वामनयना वारुणीमदविह्वला – ७४

विश्वाधिका वेदवेद्या विन्ध्याचल निवासिनी
विधात्री वेदजननी विश्णुमाया विलासिनी – ७५

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी
क्षयवृद्धि विनिर्मुक्ता क्षेत्रपाल स्मर्चिता ७६

विजया विमला वन्द्या वन्दारु जनवत्सला
वाग्वादिनी वामकेशी वह्नि मण्डल वासिनी – ७७

भक्तिमत्कल्पलतिका पशुपाश विमोचिनी
सम्हृताशेषपाषण्डा सदाचार प्रवर्तिका – ७८

तापत्रयाग्नि सन्तप्त समाह्लादन चन्द्रिका
तरुणी तापसाराध्या तनुमध्या तमोऽपहा – ७९

चिति–स्तत्पदलक्ष्यार्था चिदेकरस रूपिणी
स्वात्मानन्दलवीभूता ब्रह्माद्यानन्द सन्ततिः – ८०

पराप्रत्यक्चितीरूपा पश्यन्ती परदेवता
मध्यमा वैखरीरूपा भक्तमानस हंसिका – ८१

कामेश्वर प्रणनाडी कृतज्ञा कामपूजिता
श्रुङ्गार–रस–सम्पुर्णा जया जालन्धरस्थिता – ८२

ओड्याण पीठ निलया बिन्दु मण्डल वासिनी
रहोयाग क्रमाराध्या रहस्तर्पण तर्पिता – ८३

सद्यः प्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता
षदङ्गदेवता युक्ता शाड्गुण्य परिपूरिता – ८४

नित्यक्लिन्ना निरुपमा निर्वाण सुखदयिनी
नित्याषोडशिका रूपा श्रीकण्ठार्ध शरीरिणी – ८५

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्त–स्वरूपिणी – ८६

व्यापिनी विविधाकारा विद्याऽविद्या–स्वरूपिणी
महाकामेशनयन कुमुदाह्लाद कौमुदी – ८७

भक्तहार्धतमोभेद भानुमद्भानु सन्ततिः
शिवदूती शिवाराध्या शिवमुर्तिः शिवङ्करी – ८८

शिवप्रिया शिवपरा शिष्टेष्टा शिष्ट–पूजिता
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा – ८९

चिच्छक्ति–श्चेतनारूपा जडशक्तिर्जडात्मिका
गायत्री व्याहृती सन्ध्या द्विजबृन्द निषेविता – ९०

तत्वासना तत्वमयी पञ्चकोशान्तर स्थिता
निःसीम महिमा नित्य–यौवना मदशलिनी – ९१

मदघूर्णित रक्ताक्शी मदपाटल गण्डभूः
चन्दन द्रव दिग्धाङ्गी चाम्पेय कुसुमप्रिया – ९२

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी
कुलकुन्डालया कौलमार्ग तत्पर सेविता – ९३

कुमार गननाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी – ९४

तेजोवती त्रिनयना लोलाक्षी कामरूपिणी
मालिनी हंसिनी माता मलयाचल वासिनी – ९५

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी – ९६

वज्रेश्वरी वामदेवी वयोवस्था विवर्जिता
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी – ९७

विशुद्धिचक्र निलया रक्तवर्ना त्रिलोचना
खट्वाङ्गादि प्रहरणा वदनैक समन्विता – ९८

पायसान्न प्रिया त्वक्स्था पशुलोक भयन्करी
अरुतादि–महाशक्ति–संवृता डाकिनीश्वरी – ९९

अनाहताब्जनिलया श्यामाभा वदनद्वया
दम्ष्ट्रोज्ज्वलाक्शमालादि–धरा रुधिर संस्थिता – १००

कालरात्र्यादि–शक्त्यौघ–व्रुता स्निग्धौदन प्रिया
महावीरेन्द्र वरदा राकिण्यम्बा स्वरूपिणी – १०१

मणिपूराब्ज निलया वदनत्रय सम्युता
वज्रादिकायुधोपेता डामर्यादिभिरावृता – १०२

रक्तवर्णा मंसनिष्ठा गुडान्न प्रीतमानसा
समस्त भक्त सुखदा लाकिन्यम्बा स्वरूपिणी – १०३

स्वाधिष्ठानम्बुजगता चतुर्वक्त्र मनोहरा
शूलाद्यायुध सम्पन्ना पीतवर्णातिगर्विता – १०४

मेधोनिष्ठा मदुप्रीता बन्दिन्यादि समन्विता
दद्यन्नासक्त ह्रुदया काकिनी रूपधारिणी – १०५

मूलाधाराम्बुजारूढा पञ्चवक्त्रास्थि संस्थिता
अङ्कुशादि प्रहरणा वरदादि निशेविता – १०६

मुद्गौदनासक्तचित्ता साकिन्यम्बा स्वरूपिणी
आज्ञाचक्राब्ज निलया शुक्लवर्ना षडानना – १०७

मज्जासंस्था हंसवती मुख्यशक्ति समन्विता
हरिद्रानैकरसिका हाकिनि रूप धारिणी – १०८

सहस्रदल पद्मस्था सर्ववर्णोपशोभिता
सर्वायुधधराशुक्ल संस्थिता सर्वतोमुखी – १०९

सर्वौदन प्रीतचित्ता याकिन्यम्बा स्वरूपिणी
स्वाहा–स्वधा–मति–र्मेधा–श्रुति–स्म्रुतिरनुत्तमा – ११०

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवण कीर्तना
पुलोमजार्चिता बन्धमोचनि बन्धुरालका – १११

विमर्शरूपिणी विद्या वियदादि जगत्प्रसूः
सर्वव्याधि प्रशमनी सर्वमृत्यु निवारिणी – ११२

अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनि
कात्यायनी कालहन्त्री कमलाक्श निषेविता – ११३

ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी – ११४

नित्यत्रुप्ता भक्तिनिधि–र्नियन्त्री निखिलेश्वरी
मैत्र्यादि वासनालभ्या महाप्रलयसाक्षिनी – ११५

पराशक्तिः परानिश्ठा प्रज्ञान घनरूपिणी
माध्वीपानालसा मत्ता मात्रुकावर्ण रूपिणी – ११६

महाकैलास निलया म्रुणाल मृदुदोर्लता
महनीया दयामूर्ति–र्महासाम्रज्यशालिनी – ११७

आत्मविद्या महाविद्या श्रीविद्या कामसेविता
श्री षोडशाक्शरीविद्या त्रिकूटा कामकोटिका – ११८

कटाक्षकिङ्करीभूता कमला कोटिसेविता
शिरस्थिता चन्द्रनिभा फालस्थेन्द्र धनुः प्रभा – ११९

हृदयस्था रवि प्रख्या त्रिकोणान्तर दीपिका
दाक्षयणी दैत्यहन्त्री दक्शयज्ञ विनाशिनी – १२०

दरान्दोलित दीर्घाक्षी दरहासोज्वलन्मुखी
गुरुमूर्तिर्गुणनिधि–र्गोमाता गुहजन्मभूः – १२१

देवेशी दण्डनीतिस्था दहराकाश रूपिणी
प्रतिपन्मुख्यराकान्ता तिथिमण्डल पूजिता – १२२

कलात्मिका कलानाथा काव्यालाप विनोदिनी
सचामर रमावाणी सव्यदक्षिण सेविता – १२३

आदिशक्ति रमेयात्म परमा पावनाकृतिः
अनेककोटि ब्रह्माण्ड जननी दिव्यविग्रहा – १२४

क्लींकारि केवला गुह्याकैवल्य पददायिनी
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्ति–स्त्रिदशेश्वरी – १२५

त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूर तिलकाञ्चिता
उमा शैलेन्द्र तनया गौरी गन्धर्व सेविता –१२६

विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वर
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा – १२७

सर्ववेदान्त सम्वेद्या सत्यानन्द स्वरूपिणी
लोपामुद्रार्चिता लीलाक्लृप्त ब्रह्माण्ड मण्डला – १२८

अदृश्या–दृश्यरहिता विज्ञात्री वेद्यवर्जिता
योगिनी योगदा योग्या योगानन्दायुगन्धरा – १२९

इच्छाशक्ति ज्ञानशक्ति क्रियाशक्ति स्वरूपिणी
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी – १३०

अष्टमूर्तिरजाजैत्री लोकयात्रा विधायिनी
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता – १३१

अन्नदा वसुधा वृद्धा ब्रह्मात्मैक्य स्वरूपिणी
बृहती ब्रह्मणी भ्राम्ही ब्रह्मानन्दा बलिप्रिया – १३२

भाषारूपा बृहत्सेना भावाभाव–विवर्जिता
सुखाराध्या शुभकरी शोभनासुलभागतिः – १३३

राजराजेश्वरी राज्यदयिनी राज्यवल्लभा
राजत्कृपा राजपीठ–निवेशित–निजाश्रिता – १३४

राज्यलक्श्मिः कोशनाथा चतुरन्ग बलेश्वरी
साम्राज्यदयिनी सत्यसन्धा सागरमेखला – १३५

दीक्षिता दैत्यशमनी सर्वलोकवशङ्करी
सर्वार्थदात्री सावित्री सच्चिदानन्द रूपिणी – १३६

देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी
सरस्वती शास्त्रमयी गुहम्बा गुह्यरूपिणी – १३७

सर्वोपाधिविनिर्मुक्ता सदाशिव पतिव्रता
सम्प्रदायेश्वरी साध्वी गुरुमण्डल रूपिणी – १३८

कुलोत्तीर्णा भगाराध्या माय मधुमतीमही
गणाम्बा गुह्यकाराध्या कोमलान्गी गुरुप्रिया – १३९

स्वतन्त्रा सर्वतन्त्रेशी दक्शणामूर्तिरूपिणी
सनकादि समाराध्या शिवज्ञान प्रदायिनी – १४०

चित्कलाऽऽनन्दकलिका प्रेमरूपा प्रियङ्करी
नामपारायण प्रीता नन्दिविद्या नटेश्वरी – १४१

मिथ्या जगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता – १४२

भवदाव सुधावृष्टिः पापरण्यदवानला
दौर्भाग्य तूलवातूल जराध्वान्तरविप्रभा – १४३

भाग्याब्धि–चन्द्रिका भक्त चित्तकेकी घनाघना
रोगपर्वत–दम्भोलि–र्मृत्युदारु–कुठारिका – १४४

महेश्वरी महाकाली महाग्रासा महाशना
अपर्णा चण्डिका चन्दमुण्डासुर–निषूदिनी – १४५

क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी
त्रिवर्गदात्री सुभगा त्र्यम्बक त्रिगुणात्मिका – १४६

स्वर्गापवर्गदा शुद्धा जपापुष्प निभाकृतिः
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता – १४७

दुराराध्या दुराधर्षा पाटली कुसुमप्रिया
महती मेरुनिलया मन्दार कुसुमप्रिया – १४८

वीराराध्या विराड्-रूपा विरजा विश्वतोमुखी
प्रत्यग्-रूपा पराकाशा प्राणदा प्राणरूपिणी – १४९

मार्ताण्ड भैरवाराध्या मन्त्रिणी-न्यस्त-राज्यधूः
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा – १५०

सत्यज्ञानानन्दरूपा सामरस्य परायणा
कपर्दिनी कलामाला कामधु-क्काम-रूपिणी – १५१

कलानिधिः काव्यकला रसज्ञा रसशेवधिः
पुष्टापुरातना पूज्या पुष्करा पुष्करेक्षणा – १५२

परञ्ज्योतिः परन्धाम परमाणुः परात्परा
पाशहस्ता पाशहन्त्री परमन्त्र विभेदिनी – १५३

मूर्ताऽमूर्ताऽनित्यतृप्ता मुनिमानस हंसिका
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती – १५४

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः – १५५

प्राणेश्वरी प्राणदात्री पन्चाशत्पीठरूपिणी
विशृंखला विविक्तस्था वीरमाता वियत्प्रसूः – १५६

मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी
भावज्ञा भवरोगघ्नी भवचक्र प्रवर्तिनी – १५७

छन्दः सारा शास्त्रसार मन्त्रसारा तलोदरी
उदारकीर्ति–रुद्दामवैभवा वर्णरूपिणी – १५८

जन्ममृत्यु–जरातप्त–जनविश्रान्ति–दायिनी
सर्वोपनिषदुद्घुष्टा शान्त्यतीत कलात्मिका – १५९

गम्भीरा गगनान्तहस्था गर्विता गानलोलुपा
कल्पनारहिता काष्ठाऽकान्ता कान्तार्ध विग्रहा – १६०

कार्यकारण–निर्मुक्ता कामकेलि–तरङ्गिता
कनत्कनकताटङ्का लीलाविग्रहधारिणी – १६१

अजा–क्षयविनिर्मुक्ता मुग्धा क्षिप्र–प्रसादिनी
अन्तर्मुख समाराध्या बहिर्मुख सुदुर्लभा – १६२

त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी
निरामया निरालम्बा स्वात्मारामा सुधासृतिः – १६३

संसारपङ्क–निर्मग्न समुद्धरण पण्डिता
यज्ञप्रिया यज्ञकर्त्री यजमान स्वरूपिणी – १६४

धर्माधारा धनाध्यक्षा धनधान्य विवर्धिनी
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी – १६५

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूड़णी
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी – १६६

वीरगोष्ठी–प्रिया वीरा नैष्कर्म्या नादरूपिणी
विज्ञानकलना कल्य विदग्धा बैन्दवासना – १६७

तत्वाधिका तत्वमयी तत्त्वमर्थ स्वरूपिणी
सामगान प्रिया सोम्या सदाशिव कुटुम्बिनी – १६८

सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता – १६९

चैतन्यार्घ्य समाराध्या चैतन्य कुसुमप्रिया
सदोदिता सदातुष्टा तरुणादित्य–पाटला – १७०

दक्षिणा दक्षिणाराध्या दरस्मेर मुखाम्बुजा
खौलिनी केवलाऽनर्घ्या कैवल्य–पद–दयिनी – १७१

स्तोत्रप्रिया स्तुतिमती श्रुति संस्तुत वैभवा
मनस्विनी मानवती महेशी मङ्गलाकृतिः – १७२

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी
प्रगल्भा परमोदारा परामोदा मनोमयी – १७३

व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी
पञ्चयज्ञ प्रिया पञ्चप्रेत मञ्चाधिशायिनी – १७४

पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी
शाश्वती शाश्वतैश्वर्या सर्वदा शम्भुमोहिनी – १७५

धराधरसुता धन्या धर्मिणी धर्मवर्दिनी
लोकातीता गुणातीता सर्वातीता शमात्मिका – १७६

बन्धूक कुसुम प्रख्या बालालीला विनोदिनी
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी – १७७

सुवासिन्यर्चन प्रीताऽऽशोभना शुद्धमानसा
बिन्दुतर्पण सन्तुष्टा पूर्वजा त्रिपुराम्बिका – १७८

दशमुद्रा समाराध्या त्रिपुराश्रीवशङ्करी
ज्ञानमुद्रा ज्ञानगम्या ज्ञान–ज्ञेय–स्वरूपिणी – १७९

योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा
अनघाऽद्भुत चारित्रा वञ्चितार्थ प्रदयिनी – १८०

अभ्यासातिशय–ज्ञाता षडध्वातीत रूपिणी
अव्याजकरुणामूर्ति–रज्ञानध्वान्त दीपिका – १८१

आबालगोपविदिता सर्वानुल्लंघ्यशासना
श्रीचक्रराजनिलया श्रीमत्–त्रिपुरसुन्दरी – १८२

श्री शिवा शिव–शक्त्यैक्य–रूपिणी ललिताम्बिका
ऐवं श्री ललिता दैव्या नाम्नां साहस्रकम् जगुः – १८३

इति श्री ब्रह्माण्डपुराणे उत्तरखाण्डे श्री हयग्रीवागस्त्य
स्ंवादे श्री ललितासहस्रनाम स्तोत्रं सम्पूर्णम् ॥